दिनाङ्क :- 25.08.2025

प्रात: - 06:55

फिजी प्रधानमन्त्री भारतयात्रा::

प्रधानमन्त्री श्रीनरेन्द्रमोदी, स्वस्य फिजीदेशीय-समकक्षेन, सिटिवेनी राबुका इत्यनेन सह, अद्य दिल्लीनगरे वार्ताम् करिष्यति । फिजी-प्रधानमन्त्री, त्रिदिवसीय-भारत-यात्रार्थं ह्यः नवदिल्लीं प्राप्तः । पूर्वोत्तरक्षेत्रस्य शिक्षाराज्यमन्त्री सुकान्तमजुमदारेन, विमानस्थानके श्री-रबुकायाः स्वागतं कृतम् । तेन सह तस्य पत्नी सुलुएति राबुका अपि यात्रायां वर्तते । प्रतिनिधिमण्डले, स्वास्थ्यचिकित्सासेवामन्त्री रातु अटोनियो लाला-बालावु, वरिष्ठाधिकारिणश्च सन्ति । केन्द्रीयमन्त्री जे.पी.नड्डा ह्यः सायम्, अतिथि-गणमान्यजनानाम् आह्वानं कृतवान् । विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् प्रधानमन्त्रिणः रबुका इत्यस्य, वर्तमान-अधिकारावधौ, भारतस्य प्रथमा यात्रा अस्ति। अस्मिन् यात्रावधौ फिजी-प्रधानमन्त्री, राष्ट्रपति-द्रौपदी-मुर्मू-वर्यया सह अपि मिलिष्यति ।

प्रधानमन्त्री गुजरात::

प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्यारभ्य गुजरातस्य द्विदिवसीय-यात्रायां भविष्यति। अद्य सायंकाले अहमदाबादनगरे श्रीमोदी चतुःशताधिक-पञ्चसहस्रकोटि-रूप्यकाणां बहुविध-विकासपरियोजनानाम् उद्घाटनं करिष्यति । प्रधानमन्त्री अस्मिन् अवसरे जनसमूहमपि सम्बोधयिष्यति । स्वस्य यात्रायाः द्वितीयदिने श्रीमोदी श्वः प्रातः अहमदाबादस्य हंसलपुरे हाईब्रीड्-बैटरी-इलेक्ट्रोड इत्यस्य स्थानीयकृतस्य उत्पादनस्य उद्घाटनं करिष्यति, अथ, शतम् देशेभ्यः बैटरी इलेक्ट्रिक वाहननिर्यातस्य कृते ध्वज-प्रदर्शनं च करिष्यति । अस्मिन्नवसरे प्रधानमन्त्री चतुःशतोत्तर-एक-सहस्र-कोटिरूप्यकाणां मूल्यस्य बहुविध-रेलमार्गपरियोजनानि राष्ट्राय समर्पयिष्यति ।

रक्षामंत्री

रक्षामंत्री राजनाथसिंहः अवदत् यत् भारतं प्रथम-मानव-अन्तरिक्षयान-अभियानस्य, गगनयानस्य कृते, पूर्णतया सज्जः अस्ति। सः प्रावोचत्, यदेतत् न केवलं प्रौद्योगिकीय-उपलब्धिः अपितु आत्मनिर्भर-भारतस्य यात्रायाः नूतनः अध्यायः अस्ति । रक्षामंत्री नवदिल्ल्यां गगनयान अभियानस्य कृते चितानां यात्रिणां ग्रूप्-कैप्टन-शुभांशु शुक्ल, प्रशान्त् बालकृष्णन् नायर्, अजित् कृष्णन्, अङ्गद् प्रतापः इत्येतेषां सम्मान-समारोहं सम्बोधयन् एतत् उक्तवान्।

भारतस्य राजदूतः-तैलम्

रशिया-देशे भारतस्य राजदूतः विनयकुमारः उक्तवान् यत् भारतं यत्र यत्र उत्तम-स्पर्धात्मकतां प्राप्स्यति तत्र तत्र तैलं क्रीत्वा स्वस्य राष्ट्रहितस्य रक्षणार्थं उपायान् करिष्यति । रशिया-समाचारसंस्थायाः साक्षात्कारे विनयकुमारः अवदत् यत्, नवदिल्लीनगरे रशिया-तैलक्रयणस्य कारणेन भारतीय-आयातस्य शुल्कं पञ्चविंशति-प्रतिशतं वर्धयित्वा आहत्य पञ्चाशत् प्रतिशतं यावत् कृतः अमेरिकी-निर्णयः अकारणः, अन्यायपूर्णः, अयुक्तश्च अस्ति । तेन प्रोक्तं, यत् भारतस्य ऊर्जानीतेः उद्देश्यं स्वनागरिकाणां कृते विश्वसनीय-आपूर्तेः सुरक्षा वर्तते ।

माण्डविया - क्रीडा

केन्द्रीय-क्रीडामन्त्री मनसुखमाण्डविया प्रोक्तवान् , यत् देशस्य स्वातन्त्र्यस्य शताब्दी-महोत्सवे, सप्तचत्वारिंशदुत्तर-द्विसहस्रतमे वर्षे विश्वस्य शीर्षपञ्चसु क्रीडाराष्ट्रेषु अन्यतमः भवितुम् भारतस्य आकांक्षा अस्ति । अहमदाबाद-नगरे राष्ट्रमण्डल-भार-उत्थापन-प्रतियोगितायाः उद्घाटन-समारोहं सम्बोधयन् श्रीमण्डविया अवदत्, यत् प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे भारतं क्रीडाक्षेत्रे बहुधा प्रगतिम् अकरोत्, अस्मिन् क्षेत्रे बहूनि परिवर्तनानि अपि प्रवर्तन्ते । सः अवदत्, प्रधानमन्त्रिणा आगामिषु दश वर्षेषु विश्वस्य शीर्षदशसु देशेषु भारतस्य संस्थापनस्य लक्ष्यं स्थापितम्।

IMD WEATHER::

भारतस्य ऋतुविज्ञान-विभागेन (IMD) आगामिदिनद्वयं यावत् देशस्य वायव्यभागेषु महतीतः अत्यन्तं प्रचण्डवृष्टेः नारङ्गवर्णीय-संचेतना सूचिता । विभागस्य अनुसारं गुजरात, ओडिशा, राजस्थान, उत्तराखण्ड इत्येतेषु राज्येषु पृथक्-स्थानेषु दिनद्वयं अत्यन्तं प्रचण्डवृष्टिः भविष्यति।

धनुर्क्रीडा

कनाडादेशे ह्यः ऐषमे विश्वयुवा-धनुष्क्रीडा-प्रतियोगितायां भारतस्य शर्वरी सोमनाथ शेन्दे इत्यनया अष्टादश-वर्षसीम्नः महिला-क्रीडायाम्, व्यक्तिगत-स्वर्णपदकं प्राप्तम्। इतः पूर्वं भारतस्य चिकिथा तनिपर्थी इत्येषा कनाडादेशे आयोजितायां विश्व-स्तरीय-धनुष्प्रतिस्पर्धायां स्वकीयं प्रथमं विश्वपदकं विजित्य प्रथमा भारतीय कम्पाउंड-शीर्षक-महिला-विजेता अभवत्।